# साङ्खययोगशास्त्रयोश्चैतन्यस्वरूपम्

महामहोपाद्याय

**एन्. रङ्गनाथशर्मा**

इह साङ्ख्यशब्देन कपिलमुन्युपज्ञं साङ्खयशास्त्रं विवक्षितम्, योगशब्देन च पतञ्जलिमुन्युपदिष्टं पातञ्जलं तन्त्रम् । कापिले हि तन्त्रे पञ्चविंशतिस्तत्वानि इति संख्यां पुरस्कृत्य सिद्धान्तो निरूपित इति साङ्खयशब्दस्तत्रनिरूढः । एवं तत्रैव पञ्चशिखाचार्येण षष्टिः पदार्था इति विभज्य 'षष्टितन्त्रम्' इति ख्यातो ग्रन्थः प्रणीतः । अथवा ज्ञानार्थकेन सङ्ख्याशब्देन अयं ज्ञानशास्त्रमित्यर्थे निष्पन्नो निरूढः कापिले तन्त्रे ।

कपिलमुनिप्रणोतो मूलग्रन्थ इदानीं नोपलभ्यते । गुरुशिष्यपरम्परयागतमिदं शास्त्रं सप्तत्या कारिकाभिः संगृहीतमाचार्येणेश्वरकृष्णाभिधेन परमुपलभ्यते । यत् सर्वैरपिप्राचीन पण्डितोत्तमैः प्रमाणत्वेन्न गृहीतं वरीवर्ति । सेयं साङ्ख्यकारिकाभिधा कृतिः श्रीवाचस्पति-मिश्रादिभिः पण्डितधौरेयैर्व्याख्यान-प्रणयनेन बहुधा भूषिता । अधुना उपलभ्यमानं साङ्खयप्रवचनसूत्रं, तद्भाष्यञ्च प्रामाणिकत्वेन न पुरस्क्रियेते तज्ज्ञैः ।

साङ्ख्यकारिकायामुक्तमीश्वरकृष्णेन - एतत् पवित्रमग्र्यं
मुनिरासुरयेऽनुकम्पया प्रददौ ।
आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम् ॥
शिष्यपरम्परयागतमीश्वरकृष्णेन चैतदार्याभिः ।
संक्षिप्तमार्यमतिना सम्यग् विज्ञाय सिद्धान्तम् ॥
इति ॥

साङ्ख्यं योगश्चेति शास्त्रद्वयमपि द्वैतदर्शनम् । जीवात्मनां नानात्वस्य, मूलप्रकृत्यादीनां पञ्चविंशति तत्त्वानामुभयतस्वीकारात् । ईश्वरस्वीकारात् योगदर्शने

षड्विशांतिस्तत्त्वानि भवन्तीति विशेषः । सांख्यदर्शनमिदं प्राचीनतमं, महाभारत विष्णु पुराणादिषु बहुधोल्लिखितत्वान् सर्वैरपि बादरायणादिभिर्दर्शनकारैः परामृष्टत्वाच्च ।

इहादौ साङ्ख्यदर्शनस्य सारः संक्षेपेण निरूप्यते यदवबोधेन चैतन्यस्य स्वरूपं विस्तरेण शक्यमवगन्तुम् । सांङ्ख्यदर्शने पञ्चविंशतिस्तत्त्वान्यङ्गीकृतानि । अत्र शास्त्रे तत्त्वशब्दः पदार्थवचनः । मूलप्रकृतिः, महत् (बुद्धिः) अहङ्कारः, शब्दस्पर्शरूपरसगन्धा इति पञ्चतन्मात्राणि, आकाश वायुतेजोजलपृथिव्य इति पञ्च महाभूतानि, श्रोत्रत्वक्चक्षुजिह्वा घ्राण - वाक् पाणिपादपायूपस्थ - मनांसीति एकादशेन्द्रियाणि - इति एभ्योऽतिरिक्तः पुरुषस्य (चैतन्यम्) इति पञ्चविंशतिस्तत्त्वानि । एषु च पुरुषातिरिक्तानि मूलप्रकृत्यादीनि चतुर्विंशतिः अचेतनानि - जडानीति बोद्धव्यम् । दिक्कालौ वैशेषिकादिभिरङ्गीकृतौ पदार्थौ नात्राङ्गीकृतौ ।

मूलप्रकृतेः मूलम्, प्रकृतिः, प्रधानम्, अव्यक्तम् - इति नामान्तराणि । इयमनादिर्नित्या । महत्तत्त्वादिजननद्वारा समस्तस्य जडप्रपञ्चस्य मूलम् । अतएव- विकारजातानां प्रकृतिः कारणम् । अत एव जडपदार्थेषु प्रधानं तत्त्वम् । इन्द्रियाणामगोचरत्वेन सूक्ष्मत्त्वात् अव्यक्तमिति च गीयते । मूलप्रकृतेर्महत्तत्वं (बुद्धिः) जायते । महत्तत्वादहङ्कारः - इत्येव क्रमेण अपराणि तत्त्वानि जायन्ते । तत्र जनकत्त्वं प्रकृतेर्लक्षणम् । जन्यत्त्वं विकृतेर्लक्षणम् । विकृतिर्नाम विकारः । तत्र मूलप्रकृतिरविकृतिः । अनादित्वेन अजन्यत्वात् । महदाद्याः सप्त पदार्थाः प्रकृतिविकृतयः । स्वपूर्वतत्त्वजन्यत्वात् स्वपरतत्त्व जनकत्वाच्च । आकाशादयः षोडशपदार्थास्तु केवलं विकृतयः, तेभ्यः कस्यचिदपि तत्त्वान्तरस्य अनुत्पत्तेः । यद्यपि पृथिव्यादिपञ्च महाभूतेभ्यो वृक्षादयः प्राणिनां शरीरादयश्च उत्पद्यन्ते, तथापि वृक्षादीनां तत्त्वान्तरत्वंनास्ति, तत्त्वान्तरजनकत्वमेव प्रकृतित्त्वमित्यङ्गीकारात् । पृथिव्यादिधर्माणामिन्दियग्राह्यत्वादीनां वृक्षादिषु समत्त्वात् तेषां तत्त्वान्तरत्त्वं नास्तीति साङ्ख्यानामाशयः । चेतनः पुरुषस्तु न प्रकृतिः, कस्यापि तत्त्वान्तस्य अजनकत्वात् । नापिविकृतिः अनादिनित्यत्वेन अजन्यत्वात् । तस्मादयं पुरुषो न प्रकृति र्न च विकृतिरिति मन्तव्यम् । तदुक्तमाचार्येण ईश्वरकृष्णेन -

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारः न प्रकृतिर्न विकृतिः पुरुषः ।। इति ।

एवञ्च पञ्चविंशतिः पदार्थव्यूहः । दिक्कालौ च आकाशमेव । प्राणस्तु इन्द्रियाणां वृत्तिः, न पदार्थान्तरम् इतिस्थितिः । राजवार्तिकनाम्नि साङ्ख्यदर्शनग्रन्थे - एषु पञ्चविंशतितत्त्वेष्वपि प्रत्येकं विद्यमानान् एकत्त्व, परार्थत्व, अकर्तृत्व, बहुत्व, सिद्धि - प्रभृतीन् धर्मान् गणयित्वा "इति षष्टिः पदार्थानामष्टभिःसिद्धिभिः सह" इत्यभिहितम् । प्रकृतेऽनुपयोगान्नायं विचारस्तन्यते ।

अत्रेदं बोद्धयम् । "सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः" इति साङ्ख्यसूत्रम् । गुणानां या समावस्था प्रकृतिः सा किलोच्यते इति षड्दर्शनसमुच्चये हरिभद्रसूरिः न्यूनाधिकभावराहित्येन विद्यमानं गुणसामान्यं प्रकृतिरिति फलति । अत्र सत्त्वरजस्तमांसि शक्तिविशेषवन्ति द्रव्याण्येव, न तु वैशेषिकाभिमता गुणाः । संयोग विभागवत्वात् लघुत्व गुरुत्त्वचलत्त्वादिधर्मवत्त्वाच्च । नहि संयोगादयो गुणा द्रव्यमनाश्रित्य तिष्ठन्ति । गुणशब्दस्य रज्जुरित्यर्थान्तरमस्ति । रज्जुरिव पुरुषबन्धनोपयोगित्वात्, परार्थत्वाच्च प्रकृतेः सत्वादिषु गुणशब्दः प्रयुक्तः साङ्ख्य दर्शनकारैरित्यवगम्यते । एवं शब्दादीनि पञ्चतन्मात्राणि महाभूत जनकान्यपि परमाणुसदृशानि सूक्ष्मद्रव्याण्येव । महाभूतेषूपलभ्यमानाः शब्दादयास्तु गुणा इत्यन्यत् ।

तत्र सत्त्वं सुखरुपं प्रकाशकम् । रजो दुःखरूपं प्रवर्तकम् । तमस्तु मोहरूपं ज्ञानस्य अवरोधकम् । सत्कार्यवादः परिणामवादश्च साङ्ख्यानामभिमतौ । प्रकृतिरेव जगद्रूपेण परिणममाना जगतः कर्त्रीति बोद्धयम् । सृष्टिकर्ता परमेश्वरो नाङ्गीक्रियते ।

**पुरुषनानात्वम्**

आत्मन एकत्वे कश्चित् पुरुषः सुखी, कश्चित् दुःखी, कश्चिद्बद्धः कश्चिन्मुक्तः इत्यादि व्यवस्थाया अनुपपत्तेः प्रतिशरीरमात्मा भिन्न एवेति असंख्याताः सन्ति आत्मानः (पुरुषाः) । तदुक्तं सांख्यसूत्रे जन्मादिव्यवस्थातः पुरुषबहुत्वं इति । आत्मा

तु पद्मपत्रवन्निर्लेपोनिःसङ्गो निर्गुणो निष्क्रियश्च । चेतनस्य पुरुषस्य संनिधिमात्रेण जडायां प्रकृतौ प्रवृत्तिरूपाक्रिया जायते, लोहचुम्बक सांनिध्यात् सूच्यामिव । प्रकृतेः प्रवृत्तिश्च पुरुषविमोक्षार्था, तदुक्तम्-

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥ इति ॥

अथचैतन्यस्वरूपं विविच्यते ।

पुरुषः, आत्मा, चेतनः - चेतनम्, चैतन्यम् - इति पर्यायशब्दा एकार्थकाः । प्रायेण साङ्ख्याः पुरुषशब्दं प्रयुञ्जते चैतन्यार्थकम् . चिती संज्ञाने इति धातेर्निष्पन्नोऽयं शब्दो ज्ञानार्थकः । न च घटः पटः इत्यादि ज्ञानमेवात्मेति मन्तव्यम्। तादृशज्ञानस्य वृत्तिज्ञानत्वात्। आत्मातु प्रज्ञान शब्दाभिधेयो घटादिविषयदूरो नित्यो विभुश्च । "प्रज्ञानं ब्रह्म" "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिश्रुतेः । अनुमानमपि प्रकृत्यतिरिक्तस्य चैतन्यस्य सिद्धौ प्रमाणम् । तथाहि - चेतनाऽहं करोमि इति प्रत्ययः सर्वानुभवसिद्धः । प्रकृति परिणामस्य देहस्य जडत्वेन चेतनताधर्मः स्वरूपतस्तत्र नास्तीति परधर्मः कश्चन तत्रारोपित इति वक्तव्यम् । तेन प्रधानादीनां सर्वेषां जडत्वेन तदन्यः कश्चन चेतनताधर्मवान् पदार्थः सिध्यति । स चास्माकमात्मा पुरुषः इति । परिशेषानुमानप्रयोगश्चेत्त्थम् प्रकृतेरन्योऽस्ति चेतनाधर्मवान् शरीरे । प्रधानादीनां जडत्वेन चेतनानाश्रयत्वात्। यन्नैवं तन्नैवम् इति । गुणगुणिनोरभेदाच्च चेतताधर्मवान्, चेतनः, चैतन्यम् - इत्यादि व्यवहारः । "साक्षी चेता केवलो निर्गुणश्च" इत्यदिश्रुतेः पुरुषस्य साक्षित्वं, चेतनताधर्मवत्वम्, निःसंगरूप केवलत्वम्, निर्गुणत्वञ्च सिध्यन्ति । अयं न प्रकृतिर्नविकृतिरित्युक्तपूर्वम् । न प्रकृतिः न कस्ययित् कारणम् न कस्य-चिज्जनकम्। न विकृतिः = न कस्यचित्कार्यम् न केनापि जन्यम्, अनादित्वात् । एतादृशे चैतन्यस्वरूपे पुरुषे नित्यत्वं,व्यापकत्वं, निखयवत्वम्, अकर्तृत्वं, द्रष्टृत्वं, नानात्वं, त्रिगुणशून्यत्वम् - इत्यादयो विंशतिर्धर्माः शास्त्रकारैर्गणिताः सन्ति । प्रकृतौ तु एतद्विरुद्धाः, त्रिगुणत्वं, अचेतनत्वं, विषयत्त्वमित्यादयो धर्मा इति विवेकः ।

एवञ्च चेतनमचेतनञ्चेति पदार्थद्वयं निष्कर्षे स्थितम् । चेतनस्वरूपः आत्मा तु

प्रतिशरीरं भिन्नो जीव संज्ञितोऽनन्तः । अचेतनस्वरूपा प्रकृतिस्तु मूलप्रकृति संज्ञिका एकापि महदादिरूपेण परिणममाना घटपटाद्यात्मना अनन्ता भवतीति विज्ञेयम् ।

साङ्ख्यशास्त्रे पुरुषस्याकर्तृत्वेऽपि भोक्तृत्वमङ्गीक्रियते । उक्तञ्च साङ्ख्य-कारिकाया-मीश्वरकृष्णेन पुरुषस्य अस्तित्वसाधनावसरे "पुरुषोऽस्ति भोक्तृ-भावात्, कैवल्यार्थं प्रवृत्तेश्च" इति । अयमभिप्रायः। "अहं सुखमनुभवामि, अहं दुःखमनुभवामि" इत्यस्ति प्रत्यात्ममनुभवः। सुखादिकञ्च केनानुभूयते - भुज्यते? इति विचारे, केनापि भोक्ता भवितव्यमेवेति सिध्यति। स च भोक्ता पुरुष एव । न च बुद्धिरेव भोक्त्री भवति । सुखादीनामेव बुध्यात्म-कत्वात्। बुद्धेरेव भोज्यत्वं भोक्तृत्वंच न युज्यते, स्वात्मनि क्रियाविरोधात्। "असङ्गो ह्ययं पुरुषः" इति श्रुतिविरोधात् पुरुषे भोक्तृत्वं न युज्यते, किन्तु द्रष्टुत्वमेव । बुध्यादीनान्तु दृश्यत्वम् - इति केचिदाहुः । वस्तुतस्तु "अहं सुखं भुञ्जे, दुःखं भुञ्जे" इत्यनुभव बलात्भोक्तृत्वमपि पुरुषे बुध्युपाधिकं संभवति । परमार्थतस्तु

"अहं सुखमनुभवामि" इन्यादि प्रतीतिबुद्धिपुरुषयोः भेदाग्रहात्, भेदाग्रहश्च
अनाद्यविद्यायेति बोध्यम् ॥

पुरुषस्य अविकारित्वात् कर्तृत्वं नाभ्युपेयते । क्रिया तु प्रकृतावेव, न पुरुषे। नन्वेवं चेतनोऽहं करोमि, इच्छामि इन्याद्यनुभवसिद्धं ज्ञानेच्छाकृतीनां सामानाधिकरण्यं कथमुपपद्यते? इति चेत् । अत्राहुः । अयं सामानधिकरणप्रत्ययो भ्रान्तिरेव । भ्रान्ते र्निमित्तश्च प्रकृतिपुरुषयोः संयोगः । संयोगश्चात्र उभयोः संनिधानम् किमर्थं पुनर्भिन्नस्वरूपयोः संनिधानमिति चेत्

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥ इति कारिका ।

अयमभिप्रायः - सुखाद्यात्मकस्वस्वरूपस्य पुरुषकर्तृको भोगः प्रकृत्या अपेक्षितः। कैवल्यार्थं = कैवल्यकारणविवेक ज्ञानरुपस्य प्रकृतिपरिणामस्य प्राप्त्यर्थं पुरुषेण प्रकृतिरपेक्षिता । एवमुभयोः परस्परप्रयोजनसिध्यर्थं तयोः संयोगः

पङ्ग्वन्धयोरिव इति । यथा - एकः पङ्गुः पादहीनः गन्तुं न शक्नोति, किन्तु मार्गं द्रष्टुं शक्तः । अपरश्चान्धः गन्तुं शक्नोति किन्तु मार्गं द्रष्टुमशक्तः । केनापि निमित्तेन तौ कदाचिन्मिलितौ देशान्तरं प्राप्तुमिच्छतः । तदा अन्धः पङ्गुं स्वस्कन्धमारोपयति । अन्धः शरीरमारूढः पङ्गुः मार्गं दर्शयति । तेनमार्गेण अन्धो गच्छति । एवं परस्परसहकारेण उभावपि देशान्तरं प्राप्तुं शक्नुतः । कृतार्थयोस्तयोरनन्तरं वियोगो भवति । अत्र पङ्गुसदृशो निष्क्रियः पुरुषः । अन्धोपमा च अचेतना प्रकतिरिति बोध्यम् । प्रकृतिश्च पुरुषस्य मोक्षं संपाद्य निवर्तते । पुरुषोऽपि प्रधानं दृष्ट्वा मोक्षं लभते । एवमुभयोः कृतार्थयोरुभयोर्वियोगः पुरुषस्य कैवल्यमिति । वस्तुतस्तु अनादिरविद्यैव तयोर्मेलने निमित्तमिति सिद्धान्तः । पुरुषं विहाय प्रकृतेर्निवर्तनं मोक्ष इति । एवं चेतनेन प्रधाने वीक्षिते, प्रधाने क्रियोत्पद्यते, ततश्च महदादिक्रमेण जगतः सर्गः पुरुषोपभोगार्थम् पुरुषेण प्रधानस्य उपभोग एव संसारः ।

**अयमत्र निष्कर्षः**

अविद्यया पुरुषबुध्योर्भेदाग्रहणादेकत्वाभिमान एव तयोः सम्बन्धः। अतएव कर्तृत्वरहिते चैतन्ये कर्तृत्वं चेतनतारहितायांबुद्धौ चेतनत्वं प्रतीयत इति अहं करोमि जानामि चेति लोके व्यवहारः । तत्र बुद्धिरहङ्कारो मनश्चेति त्रीणि अन्तःकरणानि अभिधीयन्ते । इदमेवमेवेति निश्चयो बुद्धेर्वृत्तिः । सर्वप्रवृत्तावहमित्य-भिमानोऽहङ्कारस्य वृत्तिः । समीचीना कल्पना संकल्पः । इदं द्रव्यम्, इदं श्वेतम्, इयंक्रिया - इत्येदृशी कल्पना मनोवृत्तिः । ज्ञानकर्मोभयप्रवृत्तिहेतुत्वात् ज्ञानेन्द्रियं कर्मेन्द्रियंचेत्युभयात्मकं मनः ।

**ज्ञानोत्पत्तिक्रमः**

विभिन्नस्वरूपाणि घटपटादीनि वस्तूनि प्रथमं चक्षुरादि ज्ञानेन्द्रियेभ्यः स्वाकारं समर्पयन्ति । इन्द्रियाणि तमाकारं मनसे अर्पयन्ति । मनश्च अहङ्कारद्वारा बुद्धये अर्पयति । स्वच्छा द्रव द्रव्याकारा बुद्धिः अर्पितवस्त्वाकारं प्रतिपद्यते, यथा कुल्यायां प्रवहन्ती जलधारा कुल्याकारं प्रतिपद्यते तथा । वस्त्वाकारप्रतिपत्तिरियं बुद्धेः परिणामः। अयं परिणाम एव वृत्तिज्ञानमित्यवगन्तव्यम् । वृत्तिज्ञानसहितायां बुद्धावात्मनः

प्रतिफलनमेव वस्तु = साक्षात्कारः, स एव अनुभवः । नैयायिकास्तु आत्मा मनसा युज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन, ततस्तु ज्ञानरूपो गुणः आत्मनि उत्पद्यते इति संगिरन्ते । साङ्ख्यास्तु आत्मनो निर्गुणत्वात् ज्ञानं तावत् बुद्धिरूपे महत्तत्वे जायते - इन्यभिप्रयन्तीति भेदः ।

अविवेकेन बुद्धितादान्म्यापन्ने पुरुषे बुद्धिगतं ज्ञानं सुखदुःखादिमत्त्वं कर्तृत्वञ्च यथा प्रतीयेते, तथा बुद्धावपि चेतनतादत्म्यापन्ने चेतनत्ववत्वमपि प्रतीयते इति सारम्। तथाच लोके अहं जानामि, अहं करोमि, अहं सुखी, अहं दुःखी इति व्यवहारः संगच्छते ।

**पुरुषस्य बन्धः**

सर्वो हि जन्तुः प्रतिकूलतया वेदनोयं दुःखं जिहासति । तत्र लौकिकै-भैषज्यादिभिरूपायै र्जरामरणवियोगरोगादीनामात्यन्तिकी निवृत्तिर्न भवतीति मन्वानः प्रेक्षावान् पुरुषः शाश्वताय दुःखमोक्षाय प्रयतते । रोगनिदानं ज्ञात्वा चिकित्सा कर्तव्येति न्यायेन, दुःखनिमित्ते जिज्ञास्यमाने सर्वदर्शनसंमतोऽधर्म एव दुःखनिदानमित्यवगम्यते। अधर्मश्च दुष्कृतिजन्यः कश्चन संस्कारः ।

ननु कृतिसंस्कारयोः सामानाधिकरण्येन भवितव्यम् । कृतिश्चनामकर्तृत्वम्। कर्तृत्वञ्च कस्य ? सांख्यनये पुरुषस्य अकर्तृत्वात् प्रकृतेश्च जडत्वात् - इति चेत् । उक्तपूर्वमेव समाधानम् । स्वच्छेदर्पणे मुखप्रतिबिम्बवत् स्वच्छायां बुद्धौ चैतन्यस्य प्रतिबिम्बात् बुद्धि चैतन्ययोर्भेदाग्रहणात् उभयोरेकत्वाभिमानेन कृति संस्कारयोर्बुद्धौ संभवात् । वृत्तिज्ञानमिव सुखदुःखेच्छाद्वेषाधर्माधर्मसंस्कारा अपि बुद्धेरेव धर्मा इति मन्तव्यम् । बुद्धिस्तु न चेतना परिणामित्वात् मृत्पिण्डवत् । चैतन्यस्यैव परिणामित्वाभ्युपगमे विकारित्वेन तस्य अनित्यत्व प्रसङ्ग इति ।

**बुद्धेरेव बन्धमोक्षौ**

यद्यपि विभिन्नेषु शास्त्रेषु पुराणेषु च कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते इत्यादिवचनानामुपलम्भात् जीवात्मन एव संसारबन्धः, तस्यैव मोक्ष इति प्रतीयते,

लोके जनानां प्रसिद्धव्यवहारोऽपि तथैवास्ति, तथापि सांख्यशास्त्रकाराः बुद्धेरेवबन्धमोक्षावामनन्ति न तु पुरुषस्य, तस्य पुष्करपलाशवन्निर्लेपत्वात् असङ्गत्वात् धर्माधर्मसंस्कारानाश्रयत्वाच्च । जीवात्मनो बन्धमोक्षविति प्रसिद्धिस्तु अन्यथा संभवति। तथाहि । बुद्धिपरिणाम एव घटादिविषयक्वृत्तिज्ञानमित्युक्तम् । वृत्तिज्ञानविषयभूताः वित्तपुत्रकलत्रादयोविषयाः तत्संयोग वियोगजन्यसुखदुःखादयश्च बुद्धिनिष्ठा अपि बुद्धिपुरुषयोर्भेदाग्रहात् चैतन्यरूपे पुरुषे उपचरिता भवन्ति । आरोपिता भवन्तीति यावत्। अविद्यमानधर्माणामारोप एव पुरुषस्य बन्धः । वस्तुतस्तु सुखदुःखादीनां बुद्धिनिष्ठत्वात् बुद्धेरेव बन्ध इति बोध्यम् ।

अनेकजन्मसंपादितपुण्यबलेन कस्यचिदेव पुरुषधौरेयस्य सद्गुरूपदेशात् विवेकख्यातिरुपजायते। विवेकख्यातिर्नाम सम्यगात्मस्वरूपज्ञानम् । तस्य अहं निष्क्रियः, निःसङ्ग, सुखदुःखादिधर्मरहितः, प्रकृतेरहं भिन्नः, केवलं द्रष्टा प्रकृतेः इति ज्ञानम् । उक्तञ्च कारिकायाम्

दृष्टा मयेत्युपेक्षको दृष्टाहमित्युपरमत्यन्या ।

सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य । इति। इदं तात्पर्यम् = पुरुषस्तावत् उत्पन्नायां विवेकरव्यातौ अहो ! सर्वमिदं प्रकृतेरेव चेष्टा । न मे किञ्चित् इति भावेन न पुनर्दर्शनाय प्रवर्तते । प्रकृतिश्च दृष्टाऽहमनेन पुरुषेण इति मत्वा न पुनरात्मानं दर्शयति। शब्दाद्युपभोगं न जनयति । अज्ञानरूपस्य निमित्तस्याभावात् । बुद्धिश्च स्वप्रकृतौ लीयते । पुरुषस्तु चैतन्यस्वरूपस्तिष्ठति। स्वकारणे प्रवृतौ लयएव बुद्धेर्मोक्षः स्वस्वरूपेणावस्थानं वा पुरुषस्य मोक्षः इति॥

**अथ योगशास्त्रसंमतं चैतन्यम्**

तत्रभवता पतञ्जलिमहर्षिणा योगशास्त्रं प्रणीतम् । पादचतष्टयघटितस्यास्य ग्रन्थस्य आदिमं सुत्रं अथ योगानुशासनम् इति । अनुशासनमित्युक्तेरिदं न जिज्ञासाशास्त्रं किन्तु उपदेशशास्त्रमिति गम्यते । सांख्य शास्त्रस्येव योगशास्त्रस्यापि प्रकृत्यादीनि पञ्चविंशतिस्तत्वानि संमतानि, ईश्वरतत्त्वस्यापि स्वीकारेण आहत्य षड्-विंशतिस्तत्वानीति शेषः । इदमपि द्वैतदर्शनम्। ईश्वरस्याङ्गीकारात् इदं "सेश्वरसांख्यम्"

इत्यभिदीयते विज्ञैः। क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः। अपरामृष्टः = असंश्लिष्टः। संश्लिष्टस्तु संसारीजीवः । मुक्तोऽप्यसौ पूर्वकाले क्लेशादिभिः संश्लेषात् बद्ध इव । तस्मादीश्वरः कदाप्यसंश्लिष्टो नित्यमुक्तः पुरुषविशेषः । स च सर्वज्ञो निरतिशयैश्वर्यवान् । तन्निमित्तश्च अनादिसिद्ध प्राकृतशुद्धसत्त्वात्म-कचित्तसंबन्धात्। स चेश्वरः "पुर्वेषामपि गुरुः कालेनानवच्छेदात्" इति द्रष्टव्यम्। ईश्वरस्याङ्गीकारे प्राधान्येन इमानि कारणान्युदाहरन्ति -

१. परमप्रमाणभूतो वेदः, शास्त्राणि, पुराणानि च परमेश्वरं सर्वज्ञं सर्वशक्तमैककण्ठ्येन अङ्गीकुर्वन्ति ।

२. मनुष्यादिषु ज्ञानधारा परम्परया प्रवहति । नद्या इव तस्याः किञ्चिन्मूलस्रोतसा स्थिरेण भवितव्यम् । तस्या ज्ञानधाराया मूलं परमेश्वरः । अत एवायं पूर्वाचार्याणाम् ब्रह्मादीनामपि गुरुः ।

३. जडायाः प्रकृतेः पुरुषेण संयोजनं केन क्रियते ? प्रलयकाले च पुरुषात् केन वियोज्यते ? कर्तारमन्तरा जडायाः प्रकृतेः स्वतः प्रवृत्तिर्दुरुपपादा । स च कर्ता ईश्वर एव - इत्यादीनि ॥

संसारिणो जीवास्त्वनन्ताः । ते च पूर्वोक्तक्लेशादिभिः संश्लिष्टाः । अत एव संसारेण बद्धाः यथायथं सुखदुःखानि अनुभवन्ति । अविद्याऽस्मिता रागद्वाषाभिनिवेशाः पञ्च क्लेशाः तत्र अनित्ये स्वर्गादौ नित्यत्वप्रत्ययः, अशुचौ कायादौ शुचित्व = बुद्धिः, दुःखे भोजनवनितादौ सुखत्वारोपः, अनात्मनि देहादौ आत्मबुद्धिः - इत्यविद्या - चतुष्प्रकारा । प्रकृतिपरिणामे बुद्धौ प्रकृतिविदूरे चैतन्यस्वरूपे जीवात्मनि च अभेदभ्रमोऽस्मिता । रागद्वेषौ च प्रसिद्धौ। मरणादिभ्यो जायमानस्त्रासः अभिनिवेशः। एतैः पञ्चाभिः क्लेशापादकैः क्लिश्यमानो जीवो बद्धइत्यभिधीयते ।

एतैःक्लेशैः क्लिश्यमानो जीवः कदाचित् पूर्वार्जित = पुण्यबलेन सुद्गुरूंप्राप्य, तदुपदेशात् मोक्षाय यतते । तदर्थं योगशास्त्र योगानुष्ठानक्रमः, तदङ्गनि यमादीनि, ईश्वरप्रणिधानम् - इत्यादीनि साधनानि साधनपादे विस्तरेण अभिहितानि । तेषु

सम्यगनुष्ठितेषु विवेकख्यातिरुत्पद्यते । ततः क्लेशानां तन्मूलकर्मणाञ्च निवृत्तिर्भवति। पुरुषार्थशून्या गुणाः प्रधाने विलीयन्ते । जीवनाम्ना अभिहितपूर्वं कूटस्थनित्यं चैतन्यं स्वस्वरूपेऽवतिष्ठते । इदमेव मोक्षपदाभिधेयं स्वस्वरूपावस्थानं नामकैवल्यमित्यतिशोभनम् ॥